Shri Raghunath Temple MSS. Library,
JAMMU

No. ४६७७

Title घृतदानविधिः

Author x

Extent ६ पत्राणि Age सं० १८४४

Subject धर्मशास्त्रम्

घृतदानविधिः

षड् ७७

पूजनव्रतविधि ॥

॥श्रीगणेशायनमः॥अथ घृतदानविधिः॥आच
म्य॥प्राणानायम्य॥गणेशंस्मरणंकृत्वा॥देशकाल
स्वगोत्रनामांतमुलिख्य॰ममैतज्जन्मनिअमुक
कामनासिद्धयेयथाबुद्धिनियोगंविधिनाघृत
दानाख्यंकर्मकरिष्ये॰तत्रनिर्विघ्नतासिद्ध्यर्थंगण
पतिपूजनंचाहंकरिष्ये॥गणेशंपंचोपचारैःसं
पूज्यस्वगुरूंचसंप्रार्थ्य॥भक्त्यासमागतोहंतेपाद १

योऽनन्तवत्सल॥ घृतकार्यं च भवता संपाद्यं वैन
मोनमः॥ इति मैत्रेण संप्रार्थ्य पुनः पुनः प्रणमेत्॥
ततो ब्राह्मणवरणं कुर्यात्॥ यथा॥ ममेह जन्म
नि अमुककामनासिद्ध्यैऽनुष्ठेय घृतदानकर्म
णि अक्षतपरिग्रहार्थे र सिद्ध्यै: अमुकगोत्रं अमु
कशर्माणं ब्राह्मणं वा महं वृणे॥ घृतदानेनस्तु
प्रीतो ब्राह्मणः अस्तु॰ सुप्रसन्नं सुप्रसन्नं॰ इति

2

मंत्रेणयजमानं तोषयंतुरति ब्राह्मणसंवत्वा॥
शुद्धस्तमोदीपकल्पोक्तरीत्या आधारयंत्रं लिखि
त्वा रक्तचंदन रक्ततंडुलैः पूरयित्वा तन्मध्ये श्री
कार्त्तवीर्यार्जुनं संपूज्य ॐ श्री कार्त्तवीर्यार्जुन दी
पयंत्राय नमः॥ श्री घृतप्रियाय कार्त्तवीर्यार्जुना
य नमः। ॐ घृताधारयंत्राय नमः॥ ॐ यंत्रराजा
य विश्वेश्वरप्रदाय धीमहि॥ तन्नो यंत्रः प्रचोद २

यात्॥इतियंत्रंपूजयेत्॥प्रक्षालितघटपात्रंसंस्थाप्य॥
मूलमंत्रमूलगायत्रीभ्यांसकृदभिमंत्र्य॥मूलमंत्रमू
लगायत्रीभ्यांवस्त्रगालितंगव्यादिघृतंपूरयित्वाकर्पू
रवासितंकृत्वा॥मूलमंत्रगायत्र्योरंते ॐ ह्रांह्रींह्रूं का
र्त्तवीर्यरहिरहिममसमीहितंकुरुकुरुस्वाहा॥अनेनशु
द्धाज्येनपूरयामिजगत्पते॥कार्त्तवीर्यमहावीर्यसि
द्धतुमेहितं॥इतिप्रक्षेप्य॥मूलमंत्रमूलगायत्रीभ्यांप्र
त्येकंदशधाभिमंत्रयेत्॥ततःरक्तचंदनरक्तपुष्पा

भ्यां संपूज्य॥ पश्चिमाभिमुखो भूत्वा॰ कर संपुटं कृत्वा॥
ॐ श्रां ह्रीं क्रौं च्रौं स्वाहा क्रौं ॐ इति नवार्णमंत्र सकृज्जपित्वा॥
श्रौं क्रौं च्रौं क्लीं भ्रूं श्रां ह्रीं क्रौं श्रीं हुं फट् स्वाहा ॐ कार्त्तवीर्यार्जु
नाय नमः २०॥ इति मूलमंत्रं च सकृज्जप्त्वा॥ ॐ क्रौं कार्त्तवी
र्याय विद्महे सहस्रकराय धीमहि॥ तन्नोर्जुन प्रचोदया
त्॥ इति गायत्रीं सकृज्जप्त्वा॥ श्रीराजराजेश्वरं प्रणम्य॥ पू
र्वाभिमुखो भूत्वा॰॥ ध्यायेत्ततः कोटिदिवाकराभं धनुर्ध
रं बाणधरं च हस्तैः॥ रक्तांबरं रक्तविशालनेत्रं वासो ३

वसानंतरुणारुणाभं॥१॥स्वर्णोत्थजालंकृतदत्तद्दे
शंरत्नांशुकोच्चीषविलासिवक्त्रं॥नानाविधैराभ
रणैरुपेतंसुरेशान्मीशंनिश्वेशितांघ्रिं॥२॥रत्नो
ल्लसल्लोचनलोभमानंसिंहासनाध्यासितदि
व्यमूर्त्तिं॥स्वशक्तिभिर्योगकलाभिरुद्यत्कृताञ्ज
लीभिःपरितःपरीतं॥३॥गंधर्वविद्याधरकिन्नरा
णांविलासिनीभिर्मुदितांतराभिः॥नृत्यद्भुजापांग
संभिंगिताभिःसवाद्यहस्ताभिरुपासितांगं॥४॥स्व

स्वायुधात्तंक्तत हस्तपद्मैरिद्वादिभिः स्वस्वहरित्स्र

तिष्ठैः सप्ततीक्ष्णमारौ श्चविभ्योरनुज्ञां निषेवितं त्रास

विनीतवेषैः॥५॥ कार्त्तवीर्य महावीर्य सर्वदुष्ट विना

शन॥ सर्वत्र सर्वदा त्तिष्ठ दुष्टान्नाशय नाशय॥१

उत्तिष्ठ दुष्टदमन किं तिष्ठसि त्पद्वीपैकपात्तक॥

त्वामेव शरणं प्राप्तं सर्वतो रक्ष रक्ष मां॥२॥ दु

ष्टघ्न किं त्वं स्वपिषि किं तिष्ठसि चिरायसि पाहि

नःसर्वदा भद्र मयेभ्यः स्वस्तु तानिव ॥३॥ कार्त्तवीर्य
महाराज परिवार प्रियंकर ॥ घृतदानेन ममानुत्तांदे
हिकार्यंप्रसाध्यय ॥४॥ ब्राह्मणानां भवान्नर्निर्झाह्म
णाःतवमर्त्तयः ॥ तस्मा द्धृत प्रदानेन ममाभीष्ट
प्रदोभव ॥ प्रदीपकल्लिकाकारं जीवात्मानं च गुवुधाः ॥
त्वामेवचाहुरपरे भक्त्या ह्यागमवेदिनः ॥६॥ द्विजा
नां वक्रयात्रेणवर्त्यास्तनयो भवान् ॥ त्र्यम्बकस्यैषी

षि भगवन्मम कामान्प्रपूरयेति सप्तमंत्रैः प्रभुमभ्य
र्च्य॥ ततो घृतपात्रोपरि नारिकेरफलं यथाशक्त्यु
पकल्पितां दक्षिणां च स्थापयित्वा॥ ततः घृतपात्रं
वामांगुष्ठेनावष्टभ्य॥ घृतं संकल्पयेत्॥ तत्र यथा॥ दि
शाकालौ स्मृत्वा॥ अमुकगोत्रोमुकराशिः अमुक
शर्माहं ममेह जन्मनि अमुककामनासिद्धये
प्रदीपकलिकाकारजीवात्मस्वरूपिणे श्रीकार्त्त
वीर्यार्जुनाय शुद्धं वस्त्रविशोधितं गव्यमाहिषा

न्यतरमेतावत्पलसंख्याकंमंत्रपरिष्कृतं श्रीकार्त्त
वीर्यस्वरूपाय अमुकगोत्रामुकशर्मणे ब्राह्मणा
यसंप्रददेनमम॥इतिविप्रकरेजलंदद्यात्॥भो
भोब्राह्मणश्रीकार्त्तवीर्यस्वरूपाःयुयंमुखपा
त्रांतर्वर्त्तिन्यावर्ज्जीवात्मप्रदीपंदीपयंतोऽस्मत्का
र्य्यसंसाधयंतुस्वाहा इतिमंत्रेणप्रार्थयेत्॥पुनः
पुनःक्षमाप्याचम्याऽच्युतादिस्मरणंकुर्यात्॥इदंच
दानकर्मसाधुवासाधुवेतित्यादिमंत्रेणेश्वरार्पितं

कृत्वा प्रणम्य ॥ यस्य स्मृत्येति क्षमाप्यः ॥ उत्सृष्टं घृ
तदासं शान्तो विं शांक्षान्तो शान्तां शान्तो वा ब्राह्मणान् भो
जयित्वा ॥ इति घृतदानविधिः ॥ अनेन विना लवणादा
नं वा कुर्यात् फलं तदेव ॥ लवणादानं घृतदान प्रत्याम्ना
यं ॥ प्रायो ग्रंथांतरोक्त विशेष फलसंपादकं तस्माद् घृ
तदानविधिना लवणादानं विधेयं ॥ श्री संवत्
१०४७ मिति माघ कृष्ण १२ सोमे ति० गोपीप नामक
गोपालेन कातिकायामे स्वार्थं परार्थं च ममभ० ६